# संस्कृत-वार्ता:

**दिनाङ्क**: 22.03.2026 **प्रात**: - 06:55

**<u>प्रधानमन्त्री- इरान-राष्ट्रपति</u>**

प्रधानमन्त्रिणा नरेन्द्रमोदिना ह्यः इरान्-देशस्य राष्ट्रपतिना डा. मसूद् पेज़ेशकियन् इत्यनेन सह वार्तालापं कृत्वा ईद-नौरोज़-उत्सवयोः शुभाशयाः प्रदत्ता:। अयम् उत्सवकालः पश्चिम-एशियायां शान्तिं, स्थिरतां, समृद्धिं च आनयेदिति उभौ नेतारौ आशां प्रकटितवन्तौ। सामाजिकान्तर्जालीये सन्देशे प्रधानमन्त्री श्रीमोदी, अस्मिन् क्षेत्रे महत्त्वपूर्ण-मूलसौकर्याणाम् उपरि आक्रमणस्य निन्दाम् अकरोत्, येन वैश्विक-आपूर्तिशृङ्खलाः च बाधिताः भवन्ति। ईरान-देशे भारतीयनागरिकाणां सुरक्षायै ईरान्-देशस्य निरन्तरसमर्थनाय श्रीमोदी ईरानदेशस्य प्रशंसाम् अकरोत्।

**-----------------------------------**

**<u>सरकार-एल.पी.जी:</u>**

सर्वकारेण राज्येभ्यः वाणिज्यिक-एल. पि. जि. इति वात्यन्धनकोषाणां विंशतिः प्रतिशतं इतोऽपि आवंटनाय अनुमोदनं, कृतअस्ति। आवंटनमिदं पी. एन. जी. इत्यस्य दशप्रतिशतादतिरिच्य वर्तते आहत्य आवंटनं पञ्चाशत्प्रतिशतं यावत् भविष्यति। अतिरिक्तमिदम् आबंटनं प्राथम्येन भोजनालयेषु, ढाबाख्येषु आहारालयेषु, होटलाख्येषु विश्रामस्थलेषु, औद्योगिक-भोजनालयेषु, दुग्धशालासु, राज्येन अथवा स्थानीय-निकायैः सञ्चालितेषु अनुदान-प्राप्त-भोजनालयादिषु प्राधान्येन दीयते। एतस्मिन् विषये पेट्रोलियम-प्राकृतिकग्यास्-मन्त्रालयस्य सचिवः नीरज् मित्तलः

सर्वेषां राज्यानां केन्द्रशासितप्रदेशानाञ्च मुख्यसचिवेभ्यः पत्रम् अलिखत् यत् एतत् आबंटनं सोमवासरात् प्रवर्तयिष्यते इति।

---------------------------------------

**भाजपायाः सूचिः**

भाजपा-पक्षः आगामि-राज्य-निर्वाचनाय अनेकेषां अभ्यर्थिनां सूचीं अघोषयत्। पुदुचेरीतः, राज्यगृहमन्त्री नमशिवायम्, दलस्य राज्याध्यक्षः वी.पी. रामलिंगमः, विधानसभाध्यक्षः आर.सेल्वम इत्येतैः सह दश निर्दिष्टस्थानानां कृते प्रत्याशिनः घोषिताः। अद्यावधि, मुख्यमन्त्रिणा एन. रङ्गास्वामिना सह पञ्चत्रिंशदधिकैकशतम् अभ्यर्थिनः घोषिताः सन्ति। भाजपेति दलेन अस्साम्-राज्याय द्वितीया सूचिरपि प्राकाशिता, यत्र कृष्ण-साहा जीबन-गोगोई इत्येतयोः नामांकित चयनं विशिष्टस्थानाभ्यां कृतमस्ति। केरलाय तृतीयसूच्याञ्च एकादश अभ्यर्थिनः सन्ति। यत्र विधानसभायै मतदानं एप्रिल्-मासस्य नवमे दिनाङ्के भविष्यति, परिणामानां घोषणा च मे-मासस्य चतुर्थे दिनाङ्के भविष्यति।

---------------------------------------

**भारत-अफ्रीका विद्युत शिखर सम्मेलनम्**

नवदेहल्यां ह्यः अस्य वर्षस्य भारत-विद्युत्-शिखरसम्मेलनम् इत्यस्य तृतीयदिने भारत-अफ्रिका-सामरिकसहभागित्वसम्मेलनं आयोजितम्। सभायाः अध्यक्षः ऊर्जामन्त्री मनोहरलालः आसीत्। अन्येषु उपस्थितेषु विद्युत्-नवीन-पुनर्नवीकरणीय-ऊर्जा-राज्यमन्त्री श्रीपाद् नायकः, हरियाणा-राज्यस्य मुख्यमन्त्री नयाब् सिङ्घ् सैनी, मलावी-

देशस्य ऊर्जा-खनन-मन्त्रिणा डा. जीन् मथङ्गा इत्यनेन सह अनेके आफ़्रिका-देशस्य मन्त्रिणः, उद्योगप्रमुखाश्च आसन्।

---------------------------------------

**ईरान डिमोनाः**

इरान्-सम्बद्ध-प्रसारमाध्यमाः उक्तवन्तः इस्रायल्-देशस्य डिमोना इत्यनेन सह नेगेव्-परमाणुसंशोधनकेन्द्रयोः समीपस्थेषु क्षेत्रेषु ईरानेन क्षिपण्याः प्रत्याक्रणं कृतमिति, एतानि आक्रमणानि, इरान्-देशस्य बुशेर् अथ नटान्ज़्-परमाणु-सौकर्येषु अमेरिका-इस्रायल-देशयोः आक्रमणस्य प्रत्युत्तरे आसन्निति माध्यमैः प्रोक्तम्। अपरत्र इस्रायल-देशस्य अधिकारिणः परमाणु-सम्बद्ध-स्थलेषु कस्यापि प्रमुखाक्रमणस्य पुष्टिं न कृतवन्तः।

---------------------------------------

**एम. सी. जी. एस. संशोधनः**

सत्रस्यास्य आयव्यय-सङ्कल्पानुरूपम् सूक्ष्म-लघु-मध्यम-उद्यमोत्पादकानां निर्यातकानाञ्च समर्थनाय सर्वकारेण म्यूचुवल्-क्रेडिट्-गारन्टी-स्कीम् MCGS इति योजना समारब्धास्ति।

---------------------------------------

**अन्ते क्रीडावार्तायाम्**

स्क्वाश्-क्रीडायां अनाहत सिङ्घः इत्येषा स्वदेशवासिनीं तन्वी खन्ना इत्येनाम् एकाङ्कस्य प्रत्युत्तरे अङ्कत्रयैः पराजित्य मुम्बै-नगरे आयोज्यमानायाम् इण्डियन्-ओपन् पी. एस्. ए. स्क्वाश्-टूर्-कापर इति स्पर्धायाम् अन्तिम-चक्रं प्राविशत्।

॥ **<u>इति वार्ता:</u>**॥